नं० ४२५८ – घ

शास्त्रदीपिका द्वादशाध्यायः

पत्राणि ३

नं० ४२५६-घ

पुराणसूत्रदीपिकाद्वादशाध्यायः (अपूर्ण)

नं० ४२५७-घ

(१-६, २०, २१) = पत्राणि ३ (तीन)

नं० ४२५६-घ
शास्त्रदीपिका द्वादशाध्यायः (अपूर्ण)
पत्राणि ३ (त्रीणि)

नामेकादेयाषट्देयेत्यादीनां दक्षिणानामानत्यर्थत्वात् क्रयणवत् समुच्चयः संख्याश्रुतिविरोधात्तु विकल्पः १
समुच्चये संख्यान्तरोपजननात् श्रुतसंख्याहानिप्रसंगात् द्रव्यविकारानुपपत्तेरदृष्टकल्पना तथा विकल्पेन नियमपक्ष
संयाजे घ्राज्येन सह विकल्प्यमाना जाघनी विहिता जाघन्या पत्नीः संयाजयन्तीति। सा चोदकेनाग्नीषोमीये पशौ
प्राप्ता। अत्रापि पुनः श्रूयते। जाघन्या पत्नीः संयाजयन्तीति। ततोऽपि पशुगणे चोदकेन आप्नोति तत्र बहू-
नां जाघनीनां समुच्चयो विकल्पो वेति संशयः। यदि प्रतिपत्तिस्ततः समुच्चयः। अथार्थकर्म ततो वि-
कल्पः। तत्र यद्यपि दर्शपूर्णमासयोर्जाघनी गुणकृता पत्नीसंयाजानां तथाप्यग्नीषोमीये हृदया-
द्यर्थालब्धपशुनिष्पन्ना या जाघन्याः प्रतिपत्त्यपेक्षायाः प्रतिपत्तित्वेन पत्नीसंयाजे विधानं एव
मर्थं पुनर्वचनं। ततश्च दृष्टार्थत्वात् पशुगणे समुच्चयः। नैवं। आज्येन सह विकल्प्यमानायाश्चोदकप्रा-
प्तायाः पुनर्वचनं नियमार्थं यथा प्राप्तायाश्च नियमः। प्राप्तिश्च गुणभावेनेति तादर्थ्येन नियम्यते। अ-
तः पशुगणे विकल्पः॥ उखायां काम्यनित्ययोः समुच्चयो नियोगे कामदर्शनात्॥ अग्नावुखायां अनि-
त्यं श्रूयते हृत्वा गार्हपत्यतो ब्रह्मवर्चसकामस्याहृत्यावदध्यात्। आग्नीध्रादन्नाद्यकामस्येति। तत्र किं नि-
त्यस्योखास्य काम्यस्य च वा आग्नीध्रादेः समुच्चयोऽथवा विकल्प इति संदेहे। आधानमात्रं काम्याय
श्रूयते न होमः तस्मात्फलाय काम्यमवधाय होमाय पुनर्नित्योऽग्निरुखायामवधातव्य इति समुच्च-

[illegible] सं २

शा॰द्वा
१९

19

यः।स्यादेतदेवं पद्यवधानं विधीयते प्राप्तमेव तु होमार्थाग्न्यवधानमाश्रित्यां न्तरमात्रं विधीयते।तस्मा
त्तेन काम्येन।नित्यस्य निवृत्तिः।विकल्पसमुच्चयविचारे समाप्ते समुच्चय एवास्ति नास्तीति चिंत्यत इति
संगतिः॥ सआहवनीयःस्यादाकृतिसंयोगात्॥ सोयं काम्योग्निराहवनीयशब्दवाच्यः स्यादाकू
यते अग्निर्ज्ञाति तस्मादाहवनीयधर्मागतश्चीधारणादयो ऽत्र कर्त्तव्याः।नैवं।आधानजन्मनः सं
स्कारविशेषस्य वाचकोयमाहवनीयशब्दो न ससत्त्वे।तस्मिन्संस्कारे वर्त्तितुमर्हति।तस्मान्नात्राह
वनीयधर्माः॥ तस्मिन्संस्कारकर्मोपविशिष्टत्वात्॥ एवं तर्हि संस्कारास्तत्राधानादिकाः कर्त्तव्याः
होमार्थत्वात्संस्काराणामस्य चाग्नेर्होमसाधनत्वात् सत्यं होमसाधनोयमग्निः तथाप्यसंस्कृत एवा
यं संस्कृतस्थानापन्न इति नात्र संस्कारः कर्त्तव्यः॥ नहि वृक्षादाहृतस्यारणिमथनादिजः संस्कारः शक्य
ते आधातुं तस्मान्नात्र संस्काराः॥ नित्यधारणे विकल्पो न हेत्वस्मात्प्रतिषेधः स्यात्॥ काम्याग्नि
प्रसंगसमाप्य पुनर्नित्यमेवोख्याग्निमुपक्रम्य चिंतयति किमुख्यस्य नित्यधारणं नवेति विकल्पमङ्ग

राम
१९

न्नाधारणमेवेति। तत्र न प्रतिसंदध्यादिति भाष्यात्प्रतिषेधोऽसत्यां प्राप्तावनुपपद्यमानः प्रापकं विधिम
नुमापयति। तेन चानुमितेन विधिना प्रापितं प्रतिषेधेन च प्रतिषिद्धं धारणं विकल्पनमर्हतीति प्रा
प्ते विधीयते॥ सामान्येनाहवनीयधारणं गतश्रियो विहितं मुख्य आयमाहवनीयस्थानापन्नः। आ
हवनीय एव हि संतापेनोख्यः संजातः तस्य धारणं सामान्यवचनप्राप्तं गतश्रियो धारणं मुख्यविष
येऽनेन प्रतिषिध्यत इति नानेनाश्रुतविध्यनुमानं संभवति तस्माद्धार्य एवायमुख्यः॥ परार्थान्ये
कायजमानगणे॥ सत्राहीनयोरनेकयजमानसमवाये यजमानसंस्कारार्थानि श्रुकान्वारम्भणो
दुम्बरीसंमार्जनादीनि तान्येकेनैव कर्तव्यानि न सर्वैः प्रयोजनाभावादिति प्राप्तिसूत्रमेव तत्॥ अनि
यमोऽविशेषात्॥ स्वोक्तो यः कश्चित्स्यात् अविशेषात्॥ अतो येन केन चित्कृतमन्वारम्भणादिक
मितरेषु प्रसंगादुपजीवतीदं तीर्थमपि प्राप्तिसूत्रमेव सत्रेष्वपवादं वक्तुं॥ मुख्यो वा विप्रतिषेधात्॥
सत्रेषु गृहपतिरेव परार्थानि कुर्यान्नानियमः। कस्मादितरेषामार्त्विज्याविरोधात्॥ सत्रे गृहपति

श्रौ॰ द्वा
२००

रस्य यो मैत्रावरुणवत्॥ यत्तानि पुनर्यजमानसंस्कारार्थानि कर्माण्यंजनाभ्यंजनादीनि तान्यपि सत्रे किं गृ
हपतिरेव कुर्यात् उत सर्व इति संशये गृहपतिरेवेत्याह। गृहपतिसमाख्यानात्। अत्र हि गृहशब्देन कर्मोच्य
ते। तस्य पतिर्गृहपतिः सर्वेषां च यजमानानां स्वामित्वात् गृहपतिशब्दो हि त्वसति विशेषणे कस्यचिदे
षा समाख्या फलभूयस्त्व निमित्ता फलभूयस्त्वं च संस्काराधिक्यात्। अतस्तस्यैव संस्कारा नेतरेषाम्। अ
त्राभिधीयते। फलि संस्काराः सर्वैरेव कर्त्तव्याः तदभावे फलमेव न स्यात्। गृहपतिसमाख्या त्वार्त्विज्याभा
वात्। इतरेषामार्त्विज्यं कुर्वाणाः कर्मकरा इव भवंति। अयं तु केवलयजमानकरणात् स्वामिवाचिना गृहपति
शब्देनोच्यते। न च तु फलभूयस्त्वं तच्छ्रुवचनात्। साहिन्त्वायिष्ठामहि मद्भोतीति न संस्काराधिक्यात्। अ
तः सर्वे यजमानं कुर्युः। विप्रतिषेधपरं यच्चार्त्विज्य याजमानयोर्विप्रतिषेधः तत्रार्त्विज्यमेव कुर्युः।
प्रधानत्वात् कर्त्तारो हि कर्मणां गुणभूताः कर्तॄणामपि गुणभूताः संस्काराः अत्यन्तविधानाद्वा ये यज
मानस्य ऋत्विज इति ध्वनेनार्त्विज्यं यजमानानां विहितं। याजमानं तु चोदकप्राप्तमित्यार्त्विज्यं बलीयः॥

२०

राम
२०

॥ प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात्॥ विप्रतिषेधे परमिति सूत्रे याजमानार्त्विज्ययोरार्त्विज्यं बलीय
स्त्वमुक्तं तत्प्रसंगादार्त्विज्ये त्रैवर्णिकत्वमाशंक्यते॥ दर्शपूर्णमासज्योतिष्टोमादिषु किं त्रिभिरपि द्विजातिभि
रार्त्विज्यं कारयितव्यं उत ब्राह्मणैरेवेति संशयः। त्रयोप्यार्त्विज्यमर्हन्ति विद्वत्वात्स्मरणं पुनः। पुरुषा
र्थमतः कर्म वैगुण्यं नास्ति किंचन। यजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैव व्रियम वृत्त्युपाया इति नि
यमः पुरुषार्थतया स्मर्यते। न क्रत्वर्थतया। तेन क्षत्रियवैश्या वार्त्विज्यं कुर्वतो नियमातिक्रमात्का
मं स्वधर्मात्प्रच्यावेयातां न क्रतोः काचिद्गुणहानिः। तस्मात्त्रिभिरप्यार्त्विज्यं कारयितव्यमिति प्राप्ते
ऽभिधीयते। द्विजोत्तमानामार्त्विज्यं न तु क्षत्रियवैश्ययोः। ब्राह्मणार्त्विज्यनियमः क्रत्वर्थेनापि हि
स्मृतः। यज्ञं व्याख्यास्यामः इत्युपक्रम्य ब्राह्मणानामार्त्विज्यमिति स्मरंतो यज्ञसूत्रकाराः क्रत्वर्थं
न स्मरंतीति स्पष्टमेतत्॥ तथा च भगवद्बादरायणोपि। क्षत्रियो याजको यस्य चंडालस्य विशेषतः। कथ

सदसि त्वोङ्कारो हविरन्तस्य सुरर्षयद्दति सुरा देवतान्नृता ऋषयश्च ऋत्विग्भृता इति देवता हविर्भाग
निराकरणात् क्रतुवैगुण्यमेव दर्शितं। राजयाजकयाज्यस्य विनश्यति यथा हविरित्य ब्राह्मणार्त्वि
ज्य हविर्नाशः स्मृतः॥। लिंगानिव दर्शितानि। ब्राह्मणानामिदं हविरित्येवमादीनि। तस्माद्ब्राह्म
णानामेवार्त्विज्यमिति सिद्धं॥ मध्ये तंत्रं यस्य येषां विधानं तेषु प्रोक्तो मुख्य तंत्र प्रसंगः॥ जि
ज्ञास्यो यो धर्म उक्तश्चतुर्द्दा सप्रशातो लक्षणैर्द्वादशाते॥ ॥ ॥ इत्युपाध्याय पार्थसारथि
मिश्र विरचितायां शास्त्रदीपिकायां द्वादशस्याध्यायस्य चतुर्थः पादः॥ ॥समाप्तश्चाध्यायः॥
॥ ॥ ॥७॥ ॥ ॥श्री दक्षिणामूर्त्तये नमः॥ ॥श्री उमामहेश्वराभ्यां नमः॥ ॥ ॥हरये नमः॥॥
शाके संवत्सरे १७०८ शार्वरी संवत्सर पौष शुक्ल पंचम्यां समाप्तिमगात्॥ शिवाख्येन लेखि विश्वे
श्वरप्रीतये॥ ॥ ॥नमो भगवते तुभ्यं सत्यज्ञानादिरूपिणे। जगत्कर्त्रे थ भर्त्रे च संहर्त्रे शिवाय ते॥ ७॥ ७॥

रास्त्रदीपिकाद.त्रध्याय

२२

त

४२ प्र
५८ द्वि
२९ तृ
२६ च
२१ पं
४१ ष
१४ स
८ अ
३१ न
३३ द
२६ ए
२६ द्वा
शुद्ध

राम
22

४२५८ / २पत्र सं॰ १६०८